Ramsaday College. Amta
AJAY DAS, Sanskrit Department
Sem - 4th, CC-9,

१. 'दरिद्र-दुर्दैवम्' कीदृशं रूपकम्? केन च विरचितम्?

उ:- 'दरिद्र-दुर्दैवम्' प्रहसनमूलकं रूपकम्, श्रीजीवन्यायतीर्थेन च विरचितम्।

२. 'दरिद्र-दुर्दैवम्' इति रूपकस्य नायकः कः? तस्य पत्न्याः नाम किम्?

उ:- 'दरिद्र-दुर्दैवम्' इति रूपकस्य नायकः वक्रेश्वरः, तस्य पत्न्याः नाम मन्दोदरी।

३. रूपकस्य प्रारम्भिकश्लोके कस्य स्तुतिरस्ति? स्तुतिमध्ये 'शिवम्' पदस्यार्थः किम्?

उ:- रूपकस्य प्रारम्भिकश्लोके महादेवस्य स्तुतिरस्ति। स्तुतिमध्ये 'शिवम्' पदस्यार्थः 'कल्याणम्'।

४. 'मातः, मां चपेटाभिः प्रहरति निष्ठुरो ज्येष्ठः' - कस्य उक्तिरियम्? अत्र 'ज्येष्ठः' कः?

उ:- षडाननस्य उक्तिरियम्, अत्र 'ज्येष्ठः' लम्बोदरः।

५. 'यद् भक्षितं तत् किञ्चित् त्वदर्थं रक्षितम्' - कस्य उक्तिरियम्? तेन किं रक्षितम्?

उ:- लम्बोदरस्य उक्तिरियम्, तेन कियन्ति आम्रातक-पत्राणि रक्षितानि।

६. मन्दोदरी-वक्रेश्वरयोः पुत्रद्वयस्य नाम लिख्यताम्।

उ: मन्दोदरी-वक्रेश्वरयोः पुत्रद्वयस्य नाम - लम्बोदरः, षडाननः

Scanned by CamScanner